# ॥ லகு⁴ஸப்தஶதீஸ்தோத்ரம் ॥

.. laghusaptashatIstotram ..

sanskritdocuments.org

August 20, 2017

# .. laghusaptashatIstotram ..

# ॥ லகு⁴ஸப்தஶதீஸ்தோத்ரம் ॥

## Sanskrit Document Information

Text title : laghusaptashatIstotram

File name : laghusaptashatIstotram.itx

Category : devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 20, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ லகு⁴ஸப்தஶதீஸ்தோத்ரம் ॥

ஶ்ரீக³ணேஶாய நம: ॥

யத்கர்ம த⁴ர்மனிலயம் ப்ரவத³ந்தி தஜ்ஜ்ஞா
    யஜ்ஜ்ஞாதி³கம் தத³கி²லம் ஸகலம் த்வயைவ ।
த்வாம் சேதனயத இதி ப்ரவிசார்யம் சித்தே
    நித்யம் த்வதீ³யசரணௌ ஶரணம் ப்ரபத்³யே ॥ 1॥

பாதோ²தி⁴ருதை²தனயாபதிரேவ ஶேஷ-
    பர்யங்கலாலிதவபு: புருஷ: புராண: ।
த்வன்மோஹபாஶவிவஶோ ஜக³த³ம்ப³ ஸோऽபி
    வ்யாகூ⁴ர்ணமானனயன: ஶயனம் சகார ॥ 2॥

தத்கௌதுகம் ஜனனி யஸ்ய ஜனுர்த³னஸ்ய
    கர்ணப்ரஸூதமலஜௌ மது⁴கைடபா⁴க்²யௌ ।
தஸ்யாபி யௌ ந ப⁴வத: ஸுலபௌ⁴ விஹந்தும்
    த்வன்மாயயா கவலிதௌ விலயம் க³தௌ தௌ ॥ 3॥

யன்மாஹிஷம் வபுரபூர்வப³லோபபன்னம்
    யன்னைகனயகபராக்ரமஜித்வரம் ச ।
யல்லோகஶோகஜனனப்ரதிப³த்³த⁴ஹார்த³ம்
    தல்லீலயைவ த³லிதம் கி³ரிஜே ப⁴வத்யா ॥ 4॥

யோ தூ⁴ம்ரலோசன இதி ப்ரதி²த: ப்ரு'தி²வ்யாம்
    ப⁴ஸ்மீப³பூ⁴வ ஸமரே தவ ஹுங்க்ரு'தேன ।
ஸர்வாஸுரக்ஷயகரே கி³ரிராஜகன்யே மன்யே
    ஸ்வமன்யுத³ஹனே க்ரு'த ஏஷ ஹோம: ॥ 5॥

கேஷாமபி த்ரித³ஶநயகபூர்வகாணும் ஜேதும்
    ந ஜாது ஸுலபா⁴விதி சண்ட³முண்டௌ³ ।
தௌ து³ர்மதௌ³ து பரமாம்ப³ரதுல்யரூபே
    மாதஸ்தவாஸி குலிஶாத்பதிதௌ விஶீர்ணௌ ॥ 6॥

தௌ³த்யேன தே ஶிவ இதி ப்ரதி²தப்ரபா⁴வோ
    தே³வோऽபி தா³னவபதே: ஸத³னம் ஜகா³ம ।

பூ4யோऽபி தஸ்ய சரிதம் ப்ரத2யாஞ்சகார
ஸா த்வம் ப்ரதீதி ஶிவதூ3திவிஜ்ரு’ம்பி4தம் தத் ॥ 7॥

சித்ரம் ததே3தத3மரைரபி யே ந பேயா:
ஶஸ்த்ராபி4தா4தபதிதாத்3ருதி4ராத3பர்ணே ।
பூ4மௌ ப3பூ4வுரமிதா: ப்ரதிரக்தபீ3ஜா-
ஸ்தேऽபி த்வயைவ க3க3னே கி3லிதா: ஸமஸ்தா: ॥ 8॥

ஆஶ்சர்யமேதத3கி2லம் யத3பூ:4 ஸுராரி-
த்ரைலோக்யவைப4வவிலுண்ட2னஜுஷ்டபாணீ ।
ஶஸ்த்ரைர்னிஹத்ய பு4வி ஶும்ப4நிஶும்ப4ஸம்ஜ்ஞௌ
நீதௌ த்வயா ஜனனி தாவபி நாகலோகம் ॥ 9॥

த்வத்தேஜஸி ப்ரலயகாலஹுதாஶனேऽஸ்மின்-
நஸ்தம் ப்ரயாந்தி பு4வனுன்யகி2லானி ஸத்3ய: ।
தஸ்மின்னிபத்ய ஶலபா4 இவ தா3னவேந்த்3ரா
ப4ஸ்மீப4ன்வதி ஹி ப4வானி கிமத்ர சித்ரம் ॥ 10॥

கிம் வர்ணயாமி ப4வதீம் ப4வதி ப்ரதாப-
ஸம்வர்த4னப்ரணயினீ ப்ரணமஜ்ஜனேது2 ।
தத்கிம் ப்ரு’ௗுமி ப4வதீம் ப4வதி ப்ரதாப-
ஸம்வர்த4னி ப்ரணயினீம் விபதா3ஸ்தி2தேஷு ॥ 11॥

வாமே கரே ததி3தரே ச ததோ2பரிஷ்டாத்
பாத்ரம் ஸுதா4ரஸயுதம் வரமாதுலிங்க3ம் ।
கே2டம் க3தா3ம் ச த3த4தீம் ப4வதீம் ப4வானீம்
த்4யாயந்தி யேऽருணனிபா4ம் க்ரு’தினஸ்த ஏவ ॥ 12॥

யத்3வாருணுத்பரமித3ம் ஜக3த3ம்ப3 யஸ்தே
பீ3ஜம் ஸ்மரேத3னுதி3னம் மத3ஞுதி3ரூட4ம் ।
மாயாங்கிதம் திலகிதம் தருணேந்து3பி3ந்து3
நாதை3ரதீந்த்3ரமிஹ ராஜ்யமஸௌ பு4னக்தி ॥ 13॥

ஆவாஹனம் யஜனவர்ணனமக்3னிஹோத்ரம்
கர்மார்பணம் தவ விஸர்ஜனமத்ர தே3வி ।
மோஹான்மயா க்ரு’தமித3ம் ஸகலாபராத4ம்

மாத: க்ஷமஸ்வ வரதே3 ப3ஹிரந்தரஸ்தே2 ॥ 14 ॥

அந்த:ஸ்தி2தாப்யகி2லஜந்துஷு தந்துரூபா
வித்3யோதஸே ப3ஹிரிஹாகி2லவஸ்துரூபா ।
கா பூ4ரிஶப்3த3ரசனா வசனாதிகா3ஸி
தீ3னம் ஜனம் ஜனனி மாமிஹ நிஷ்ப்ரபஞ்சம் ॥ 15 ॥

ஏதத்படே2த்3னுதி3னம் த3னுஜாந்தகாரி
சண்டீ3சரித்ரமதுலம் பு4வி யஸ்த்ரிகாலம் ।
ஶ்ரீமான்ஸுகீ2 த3னுஜபூர்ணப4க:3 க்ஷமீ ஸ்யா-
த்3யோகீ3 சிரந்தனவபு: கவிசக்ரவர்தீ ॥ 16 ॥

இதி லகு4ஸப்தஶதீஸ்தோத்ரம் ஸம்பூர்ணம் ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

.. laghusaptashatIstotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*